# ಕರ್ನಾಟಕ ಶಾಲಾ ಪರೀಕ್ಷೆ ಮತ್ತು ಮೌಲ್ಯನಿರ್ಣಯ ಮಂಡಲಿ

ಮಲ್ಲೇಶ್ವರಂ, ಬೆಂಗಳೂರು-560003

# KARNATAKA SCHOOL EXAMINATION AND ASSESSMENT BOARD

Malleswaram, Bengaluru-560003

## ಎಸ್.ಎಸ್.ಎಲ್.ಸಿ. ಮಾದರಿ ಪ್ರಶ್ನೆಪತ್ರಿಕೆ 2022-23

### ವಿಷಯ : ತೃತೀಯ ಭಾಷೆ – ಸಂಸ್ಕೃತ

### SUBJECT: Third Language - Sanskrit

ಸಮಯ: 3 ಗಂಟೆ

ಗರಿಷ್ಠ ಅಂಕಗಳು : 80

ವಿಷಯ ಸಂಕೇತ: 67S

**CCE-RF**

**ಶಾಲಾ ಅಭ್ಯರ್ಥಿಗಳಿಗೆ**

---

***ಪರೀಕ್ಷಾರ್ಥಿಗಾಗಿ ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :***

1. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯು ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ 38 ಪ್ರಶ್ನೆಗಳನ್ನು ಹೊಂದಿದೆ.
2. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಹಿಮ್ಮುಖ ಜಾಕೆಟ್ ಮೂಲಕ ಮೊಹರು (ಸೀಲ್) ಮಾಡಲಾಗಿದೆ. ಪರೀಕ್ಷೆ ಪ್ರಾರಂಭವಾಗುವ ಸಮಯಕ್ಕೆ ನಿಮ್ಮ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಬಲಬದಿ ಪಾರ್ಶ್ವವನ್ನು ಕತ್ತರಿಸಿ, ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯಲ್ಲಿ ಎಲ್ಲಾ ಪುಟಗಳು ಇವೆಯೇ ಎಂದು ಪರೀಕ್ಷಿಸಿಕೊಳ್ಳಿ.
3. ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳಿಗೆ ಕೊಟ್ಟಿರುವ ಸೂಚನೆಗಳನ್ನು ಪಾಲಿಸಿ.
4. ಬಲ ಭಾಗದಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಅಂಕಿಗಳು ಪ್ರಶ್ನೆಗಳಿಗಿರುವ ಪೂರ್ಣ ಅಂಕಗಳನ್ನು ತೋರಿಸುತ್ತವೆ.
5. ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಓದಿಕೊಳ್ಳಲು 15 ನಿಮಿಷಗಳ ಕಾಲಾವಕಾಶವು ಸೇರಿದಂತೆ, ಉತ್ತರಿಸಲು ನಿಗದಿಪಡಿಸಲಾದ ಸಮಯವನ್ನು ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಮೇಲ್ಭಾಗದಲ್ಲಿ ಕೊಡಲಾಗಿದೆ.

***परीक्षार्थिनां सामान्यसूचनाः***

1. अस्मिन् प्रश्नपत्रे वस्तुनिष्ठाः विषयनिष्ठाश्च अष्टत्रिंशत् (38) प्रश्नाः सन्ति ।
2. इदं प्रश्नपत्रं विपरीतेन आवरणेन मुद्रिताङ्कमस्ति । परीक्षासमये प्रश्नपत्रमुद्घाटयितुं दक्षिणपार्श्वेन कर्तयत । प्रश्नपत्रस्य पृष्ठानि पूर्णानि सन्ति वा इति अवलोकयत ।
3. वस्तुनिष्ठानां विषयनिष्ठानां च प्रश्नानां विषये निर्दिष्टाः नियमाः अनुपालनीयाः ।
4. प्रश्नानां प्रति अधिकृताः अङ्काः पार्श्वे लिखिताः सन्ति ।
5. प्रश्नपत्रमुत्तरयितुं निर्धारितः समयावधिः प्रश्नपत्रस्य उपरि भागे लिखितः अस्ति । पञ्चदशनिमेषाः प्रश्नपत्रस्य पठनार्थं निर्धारिताः सन्ति ।

**I. अधोलिखितप्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः । तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह उत्तरपत्रिकायां लिखत ।** **8 × 1 = 8**

1. 'सन्तोषः' अस्य समानार्थकं पदम् इदं भवति ।

   (A) पारितोषकः (B) आनन्दः

   (C) सन्तापः (D) सूचकः

2. 'विघ्नः' अस्य विरुद्धार्थकं पदम् इदं भवति ।

   (A) विघ्नेश्वरः (B) विघ्ननिवारकः

   (C) निर्विघ्नः (D) विघ्ननाशकः

3. 'रघुवंशस्य' अत्र एषा विभक्तिः वर्तते ।

   (A) षष्ठीविभक्तिः (B) सप्तमीविभक्तिः

   (C) तृतीयाविभक्तिः (D) चतुर्थीविभक्तिः

4. 'प्रायच्छत्' अत्र एषः लकारः भवति ।

   (A) लङ्लकारः (B) लिङ्लकारः

   (C) लट्लकारः (D) लिट्लकारः

5. 'वसति' अत्र एषः पुरुषः भवति ।

(A) उत्तमपुरुषः    (B) मध्यमपुरुषः

(C) अन्यपुरुषः    (D) प्रथमपुरुषः

6. 'अस्मदीयः' अत्र एषः तद्धितप्रत्ययः वर्तते ।

(A) 'थल्' प्रत्ययः    (B) 'छ' प्रत्ययः

(C) 'तसिल्' प्रत्ययः    (D) 'वतुप्' प्रत्ययः

7. 'सा पत्रं <u>लेखन्या</u> लिखति' । अत्र रेखाङ्कितपदस्य इदं कारकं वर्तते ।

(A) कर्तृकारकम्    (B) कर्मकारकम्

(C) करणकारकम्    (D) सम्प्रदानकारकम्

8. 'कृष्णः कालिङ्गसर्पात् जनान् रक्षितवान्' । अत्र कृदन्तपदम् इदं भवति ।

(A) कृष्णः    (B) कालिङ्गसर्पात्

(C) जनान्    (D) रक्षितवान्

**II. चतुर्थं पदं लिखत ।** **4 × 1 = 4**

9. महोत्सवः – कर्मधारयसमासः :: पुस्तकमेला – ........................ ।

10. गुरुः – दक्षिणामूर्तिः :: हिमघ्नः – .............................. ।

11. दशकण्ठः – रावणः :: दाशरथिः – ........................ ।

12. संन्यासी – स्वामी विवेकानन्दः :: शिष्यः – .................... ।

**III. एकवाक्येन उत्तरं लिखत ।** **4 × 1 = 4**

13. विशिष्टाद्वैतसिद्धान्तप्रतिपादकः कः ?

14. लङ्कानगरं केषां राजधानी ?

15. देवासुरैरपि न भेद्यं किम् ?

16. पूज्यनदी का ?

**IV. द्वित्रैः वाक्यैः उत्तरं लिखत ।** **4 × 2 = 8**

17. कालान्तरे कानि विनश्यन्ति ?

18. मेलुकोटे क्षेत्रस्य नामान्तराणि कानि ?

अथवा

मेलुकोटे क्षेत्रे आकर्षक-स्थानानि कानि ?

19. कतिविधाः जनाः देवं भजन्ते ? ते च के ?

20. विश्वसंस्कृतमेलायां के के अंशाः आसन् ?

**V. संस्कृतभाषया अनुवादं कुरुत । 1 × 2 = 2**

21. ವಿದ್ಯಾರ್ಥಿಗಳು ಪ್ರತಿದಿನ ಶಾಲೆಗೆ ಹೋಗುತ್ತಾರೆ. ಶಾಲೆಯಲ್ಲಿ ಸಂಸ್ಕೃತ ಭಾಷೆಯನ್ನು ಕಲಿಯುತ್ತಾರೆ.

Students go to the school everyday. They learn Sanskrit Language in the School.

**VI. कर्नाटकभाषया आङ्ग्लभाषया वा अनुवादं कुरुत । 1 × 2 = 2**

22. नारिकेलवृक्षः कल्पवृक्षः इति भूलोके जनाः भावयन्ति । अस्य वृक्षस्य सर्वे भागाः उपयोगाय भवन्ति ।

[ Turn over

**VII.** 23. **विग्रहवाक्यं लिखत ।** **1 × 2 = 2**

a) शूलपाणिः ।

b) प्रतिदिनम् ।

**अथवा**

**समस्तपदं लिखत ।**

a) विधिम् अनतिक्रम्य = ................

b) महत् बलं यस्य सः = ..................

**VIII. लक्षणं विलिख्य अलङ्कारस्य नाम लिखत ।** **1 × 2 = 2**

24. करारविन्देन पदारविन्दम् ।

**IX. यथानिर्देशम् उत्तरं त्रिचतुरैः वाक्यैः लिखत ।** **2 × 3 = 6**

25. "जित्वा पृथिवीं ददामि" ।

कः पाठः ? कः अवदत् ? कम् अवदत् ?

26. "गच्छ ! अद्य अहं पुस्तकं न दास्यामि" ।

क: पाठ: ? क: अवदत् ? कम् अवदत् ?

**X.** 27. **सन्धिं विभज्य नाम लिखत ।** **1 × 3 = 3**

a) रामस्तत्र

b) युगादारभ्य

c) सेवक इति ।

**XI. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत ।** **1 × 3 = 3**

28. 'ज्योत्स्नां विनापि निवसेन्निशि शीतभानुः' ।

**XII. कवेः देश-काल-कृतीनां विषये त्रिचतुरैः वाक्यैः उत्तरं लिखत ।** **1 × 3 = 3**

29. डा. बा.श्री. रामकृष्णराव् ।

**अथवा**

भोजराजः ।

**XIII. पद्यपाठस्य नाम विलिख्य तात्पर्यं पञ्चषैः वाक्यैः कर्नाटकभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत ।** **3 × 3 = 9**

30. शीलं शौर्यमनालस्यं पाण्डित्यं मित्रसङ्ग्रहः ।

अचोरहरणीयानि पञ्चैतान्यक्षयो निधिः ।।

31. न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।

तत्स्वयं योग-संसिद्धः कालेनात्मनि विन्दति ।।

32. आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः ।

आगमैः सदृशारम्भ आरम्भसदृशोदयः ।।

**XIV. पद्यपाठस्य नाम विलिख्य पद्यं पूरयत ।** **1 × 3 = 3**

33. शारदा ........................................................................................ ।

........................................................................................ क्रियात् ॥

**XV. दशवाक्यैः उत्तरं कर्नाटकभाषया, आङ्ग्लभाषया, संस्कृतभाषया वा लिखत।**

**2 × 4 = 8**

34. कृष्णेन अर्जुनस्य मिथ्याभिमानः कथं खण्डितः ?

35. भारतस्य आदर्शनारी 'उभयभारती' इति विषयं विवृणुत ।

**अथवा**

विक्रमः वेतालश्च कथां विवृणुत ।

**XVI. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत ।** **1 × 4 = 4**

36. उत्तरकन्नडमण्डलस्य शिरसिनगरस्य समीपे सोन्दा नाम पवित्रं क्षेत्रम् अस्ति । शिरसि-यल्लापुर मार्गे केवलं विंशति कि.मी. अन्तरे अस्ति । पुरा एतदेव स्थानं 'सोमदापुरम्' 'सुधापुरम्' इति च नाम्ना ख्यातमासीदिति इतिहासेन ज्ञायते । अत्र च सोमशब्दस्य अस्ति वैशिष्ट्यं यत् श्रौतयज्ञे उपयुज्यमानस्य लताविशेषस्य नाम 'सोम' इति वर्तते । प्राचीनकाले अत्र विशेषतः 'सोमलता' लभ्यते स्म इति इदं स्थानं

[ Turn over

'सोमदापुरम्' इति ख्यातिम् अलभत । सोन्दाक्षेत्रे एव त्रिविक्रमदेवालयः, वादिराजमठः वादिराजवृन्दावनं भूतराजः च श्रद्धाकेन्द्राणि वर्तन्ते । सोदेक्षेत्रे एव वादिराजस्वामिनः तपोमग्नाः आसन् ।

i) कस्मिन् मण्डले सोन्दानाम क्षेत्रम् अस्ति ?

ii) सोमशब्दः कस्य नाम वर्तते ?

iii) सोन्दाक्षेत्रे कानि श्रद्धाकेन्द्राणि वर्तन्ते ?

iv) अत्र के तपोमग्नाः आसन् ?

**XVII. द्वादशवाक्यैः प्रबन्धं लिखत ।** **1 × 4 = 4**

37. संस्कृतभाषायाः गरिमा ।

**अथवा**

परिसरसंरक्षणार्थम् उपायाः ।

**XVIII. पत्रं लिखत ।** **1 × 5 = 5**

38. बेङ्गलूरुमण्डलस्य सर्वकारीयप्रौढशालायाः छात्रः/छात्रा इति मत्वा दिनत्रयस्य विरामं सम्प्रार्थ्य मुख्योपाध्यायं प्रति पत्रं लिखत ।

**अथवा**

बेङ्गलूरुमण्डलस्य सर्वकारीयप्रौढशालायाः छात्रः/छात्रा इति मत्वा अध्ययनविषये मित्रं प्रति पत्रं लिखत ।